# Shri Ramakrishna nanda Stuti

# श्रीरामकृष्णानन्दस्तुतिः

## Document Information

Text title : Shri Ramakrishna nanda Stuti

File name : rAmakRRiShNAnandastutiH.itx

Category : deities_misc, gurudev, rAmakRiShNa, stuti

Location : doc_deities_misc

Proofread by : Aruna Narayanan

Description-comments : rAmakRiShNastotramAlA, stavanAnjali

Acknowledge-Permission: Ramakrishna Shivananda Mission, Varasat

Latest update : June 12, 2023

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

June 12, 2023

*sanskritdocuments.org*

# श्रीरामकृष्णानन्दस्तुतिः

रामकृष्णानन्द-रामकृष्णयोरुभयोः स्मृतिः ।
पुनाति चित्तं सन्मार्गं प्रवृत्तिं वितनोति च ॥ १॥

श्रीरामकृष्णांशजनिं स्वकीयां नाम्नैव न स्वाचरणैरपीह ।
लोके जनानां प्रकटां विधाय श्रीरामकृष्णः स्वपदं जगाम ॥ २॥

श्रीरामभद्रस्य यथाञ्जनेयस्तथास्य सच्छिष्यगणेषु कश्चित् ।
भक्तः किलासीच्छशिनामधेयः शीलेन वृत्तेन च माननीयः ॥ ३॥

श्रीरामकृष्णं परमहंसमाप्स्वा तदीय दृष्ट्या विवशीकृतात्मा ।
तत्पादसेवां विविधां विधाय छायात्मतामस्य जगाम चासौ ॥ ४॥

सर्वेषु भूतेषु च तुल्यदृष्टिः शास्त्रार्थसम्पादनसक्तचितः ।
श्रीशारदाश्लाघित सच्चरित्रो नामापि लेभे स्वगुरोः पवित्रम् ॥ ५॥

अधीतबोधाचरणप्रचारैराचार्यभावं समुपेयिवांसम् ।
श्रीरामकृष्णाभिमतं विशुद्धं जितेन्द्रियं बुद्धिमतां वरिष्ठम् ॥ ६॥

स्वाचार्यसिद्धान्तनिविष्टचित्तं निरीक्ष्य तं सद्गुण सन्निधानम् ।
तन्मित्रवर्गाग्रसरो विवेकानन्दाभिधः प्राप मुदं प्रकृष्टाम् ॥ ७॥

चेतोहरां चेन्नपुरीति लोके विख्यातनाम्नीं नगरीं कदापि ।
तं प्रेषयामास हि रामकृष्णराद्धान्तसारं प्रकटं विधातुम् ॥ ८॥

शान्त्या च दान्त्या च तितिक्षया च गुरौ च भक्त्यामलयापि मत्या ।
सम्मानितः सर्वविदां समाजैः क्रमेण स ख्यातिमिह प्रपेदे ॥ ९॥

मयूरपुर्यां महिते प्रदेशे साह्येन केषामपि सज्जनानाम् ।
स्वावासमेकत्र मित प्रकल्प्य विद्यालयं कल्पयति स्म कश्चित् ॥ १०॥

नरेन्द्रसङ्कल्पितमर्थजातं सम्प्राद्यमद्राख्यपुरे समग्रम् ।
स्थानं स्वकीयं पुनरेत्यज पश्चात् तत्या योगेन तनुं स्वकीयाम् ॥ ११॥

मङ्गलं रामकृष्णाय परमहंसस्वरूपिणे ।
कारुण्यसिन्धवे लोकबन्धवे विजितात्मने ॥ १२॥

सौजन्यनिधये रामकृष्णानन्दाय धीमते ।
दीनानामवने बद्धदीक्षायाह्यस्तु मङ्गलम् ॥ १३॥

इति श्रीवी० आर० कल्याणसुन्दरशास्त्रिविरचिता
“श्रीरामकृष्णानन्दस्तुतिः” समाप्ता ।

प्रणाममन्त्रः-
रामकृष्णगतप्राणं हनुमद्भाव भावितम् ।
नमामि स्वामिनं रामकृष्णानन्देति संज्ञितम् ॥

Proofread by Aruna Narayanan

*Shri Ramakrishna nanda Stuti*
pdf was typeset on June 12, 2023

Please send corrections to *sanskrit@cheerful.com*